कादम्बरीकथासारः

रू० ४

१५०

का॰द॰
१

॥श्रीगणेशायनमः॥ ✱ ॥ॐअविघ्नमस्तु॥ ॥श्रियंदिशंतुवःशौरेर्दृ येतुल्यश्रमाः
क्रमाः॥ तेवादौगोष्पदंयस्मात्त्रैलोक्यंक्रामतक्षये॥१॥ सरसास्सदलंकाराःप्र
सादमधुरागिरः॥ कांतास्तान्जयंतस्यजयंतिजगतोगुरोः॥२॥ गुणोद्योतनूरू
पानांसतांनपरसुहृत्ले॥ यावन्मलिनमप्येषांकर्म्मदृहेःप्रसाधनं॥३॥ गुणैःशो
पिप्रथ्यतेदृष्टुरप्यपचीयते॥ प्राप्यसाधुखलौचेंद्रःपक्षाविवसितासितौ॥४॥ शक्ति
र्भामानवत्गौडोन्यारहाडकलेहिजः॥ स्वाघोत्रिसारमासाधक्कतत्सारपरिग्रहः॥

नन्दामिस्वामिभिधानो मृदात्मजस्तेजसां निधिः। जनेन दोषोपरमप्रबुद्धेनाद्भितो
दयः॥६॥ समाक्रिस्वामिने पुत्रमवाप श्रुतशालिने॥ राज्ञः कर्कोटवंशस्य चंद्रापीड
स्य मंत्रिणे॥७॥ कल्याणस्वामिना मास्य या सवल्कादेवा मवत्॥ तनयः शुद्धयोग
र्द्धिनिर्धूतमवकल्मषः॥८॥ अगाधहृदयात्तस्मात्परमेश्वरमंडनं॥ अजायत सुतः कां
तश्चंद्रोदुग्धोदधेरिव॥९॥ पुत्रं कृतज्ञानानंदं जयंतमजीजनत्॥ व्यक्ताकविद्वलव
त्कृत्वफलायत्रेस.रस्वती॥१०॥ हृत्तिकार इति व्यक्तं द्वितीयं नाम बिभ्रतः॥ वेदवे

सांगविदुषः सर्वशास्त्रार्थवादिनः ॥११॥ जयंतनाम्नः सुधियस्साधुसाहित्यतत्त्ववित् ॥
स्तनुस्समभवत्तस्मादग्निनेद इति स्मृतः ॥१२॥ काव्यविस्तारसंधानखेदालसधियं
प्रति ॥ तेन कादंबरीसिंधोः कणामात्रं समुद्धृतं ॥१३॥ वन्हवविदिशानामपुरीवेत्र
वतीतटे ॥ याप्रुण्यकर्म्मणां तेजःशालिनां घोरिवास्पदे ॥१४॥ रेजे रत्नगृहस्योति
ज्ञाल्लैरिद्राग्रुद्ग्रप्रभैः ॥ तस्यां निजभुजोद्योगविजितारातिमंडलः ॥१५॥ आखंडल इव
श्रीमान्राजा मुंडक इत्यभूत् ॥ स्वष्टानां लोकपालानां रूपं विभ्रदपि प्रजाः ॥१६॥ श्री

राम
२

म्यद्दानं दयन्न तानि म्बंद्रमाइत्यवेदिय:॥ समेदिंनी विनिर्ज्जित्य चतुरंगो धिमेखलाम्।
॥१७॥ आस विद्यार्प्पित तन्त्रा रस्त स्या मास्ते यथासुखे॥ तेनानुद्दिष्ठितजनैरन्यो न्यम
विरोधिभिः॥१८॥ विनोदैर त्यनीयेत नवे वयसिवासराः॥ तस्यन्वान न्याल न्यानां सु
खानां पारदृश्वन:॥१९॥ पूर्नोपि सुरतक्रीडापराड्सुखमन्नमन:॥ प्रयत्नेनापिना
ऽवापि सा योषि द्विषमेष्टणा॥२०॥ हन्तुं शशाक यो तस्य हृदयं वसुरेवधा॥ अथ वासं
ग णस्था नवर्त्तिनं तेकदाचन॥२१॥ प्रसत्य प्रश्रय प्रह्वा प्रतीहारी व्यजिज्ञपत॥ हृगा डु
पायनीकृत्य स्तुकमाम्ब यविवे स्थिते॥२२॥ चेडाल दारिकाका विदागता दर्शनार्थिना॥

कृत्वाञ्जलिं परामृष्य मुखमालोक्य मंत्रिणः ॥२३॥ समादिदेश तं राजा को दोषः भवि
शश्चिति ॥ निर्जने न लक्ष्मणालोकस्य परिहरं त्वया ॥२४॥ मातंगकन्यका विहदनुक्ता
तान्नृपांगणम् ॥ तया च सहस्तस्थ सशुकस्वर्णपंजरः ॥२५॥ वहन्नहिंस्त्रमाकारं चंडालः
स्थविरोऽविशत् ॥ प्रविशंतौ तु तौ दृष्ट्वा कन्यामद्भुतदर्शनाम् ॥२६॥ परं व्यस्मयत क्ष्मा
पः द्वाणी चेतस्य चिंतयत् ॥ इदं रूपमियं कोतिरिमेलावण्यशीकराः ॥२७॥ मन्ये तामपि न
प्राकृतं मर्त्यांग चेतुकाकथा ॥ मेनका मिव पश्यामि नूनं मातंगमायया ॥२८॥ छन्नेयं देव
ता काचिन्मर्त्यलोकमुपागमत् ॥ इत्यादि चिंतयेतं साग्रगणं वनितेव तं ॥२९॥ प्रणनाम

महीपालमनाकुलविलोकिना॥ ततः क्षितितलन्यस्तजानुः प्रणतकंधरः॥ ३०॥ गादो
न्नयकरासक्तपंजरः स्थविरोब्रवीत्॥ वैशंपायननामायं रत्नमत्यद्भुतं शुकः॥ ३१॥ रत्ना
नां वास्पदं देव दुग्धोदधिरिवापरः॥ इत्यादेशेन नः स्वामिन् दुहित्राऽयमुपाहृतः॥ ३२॥
प्रसादः क्रियतामस्याः पतगः परिगृह्यतां॥ ३३॥ इत्युक्त्वासोऽग्रतो राज्ञः पंजरं माणिक्कु
ट्टिमे॥ विनिधाय प्रणम्यैनं स प्रश्रयमपासरत्॥ ३४॥ इंगितज्ञा प्रतीहारी विहृतहार
संपुटम्॥ अकरोत्पंजरं तस्मान्निर्ययौ स विहंगमः॥ ३५॥ उत्क्षिप्य दक्षिणं पादं जयश

रश्रुदार्यसः॥ प्रयुक्तवेदमंत्राशीरिमामाप्यमिथाऽपमत्॥३६॥ स्तनतुगमस्कस्तातंस
मीपतरवर्त्तिहृदयशोकाग्नेः॥ चरतिविमुक्ताहारं व्रतमिव भवतोरिपुस्त्रीलो॥३७॥ता
माक एषमहीपालोविस्मयोत्फुल्ललोचनः॥ कुमारपालनामानं प्रधानामात्यमब्र
वीत॥३८॥ दृष्टं भवद्भिराश्चर्यमीदृशं क्कतमेववा॥ तिर्यक्षेऽतिशयःसोयेयोमनुष्ये
षुदुर्लभः॥३९॥ कृताध्ययनसंस्कारो मातंगऽजनसंगतिः॥ मातंगस्य चकनोयमितिवि
त्रपरंपरा॥४०॥ अमात्यस्तत्वभूपधादेनंसर्वसंस्कारकारिताः॥ भवंत्यतिशयाःप्रायःप्रा

ऐनां कोत्र विस्मयः॥४१॥ एतानि तानि लिंगानि परलोकानुमां प्रति॥ नास्तिकैः प्रतिप
द्यंते लोकायत्तनिराकृतैः॥४२॥ विचित्रा वेधसः सृष्टिर्विचित्राः कर्मवासनाः॥ विचित्रा
स्तद्विपाकाश्च विचित्रः कालपर्य्ययः॥४३॥ इत्यादि सूक्तसंवेधकथाविच्छेदकारणं॥ उ
दस्त्रत्वारगंभीरो मध्याह्नपटहध्वनिः॥४४॥ वहिः प्रकल्पतामस्याः सुखमावसथादि
कम्॥ अयं चाप्यंतरं यत्र रथ्यस्य पः प्रवेश्यतां॥४५॥ इत्यादिश्य प्रतीहारोंसमामोऽङ्न्म
हीपतिः॥ विसर्ज्जिचराजन्यचक्रं सेवार्थमागतं॥४६॥ ततः कृताल्पव्यायामः स्नातः प्रक्षि

5

तद्दैवतः॥ कृताग्निः कृतविप्राशीर्भुक्त्वाशयां स्वहृद्ययो ॥४७॥ तत्र पर्यंकमारुह्य ध्यात्वा वै
किमपिच्छलो॥ तमंतःपुरविश्रांते शुकमाना यथ्यनुनः॥४८॥ तेचक्रेत्तुकिनानीतमादौश्छ्रू
सुखादिकैः॥ पप्रच्छ कौतुकाद्विप्रस्तहृन्नीतमनंतरम्॥४९॥ वैशंपायन कौतुल्वं छकङ्गातः
कोषितस्थिरो॥ कुतस्त्यमिदंमोहत्नेक कलाशास्त्राद्विकौशले॥५०॥ अपि जातिस्मरः कोपि
भवान् भूमिमिमांगतः॥ नत्वस्यतिशयप्राप्तिरियती पक्षिजातिषु॥५१॥ केन वा त्वं वतो ना
म हृते विप्रजनोचितो॥ ईदृशान्यभिधानानि कृतोऽन्यजनवेश्मसु॥५२॥ कथं चोडालसं

पर्यद्देह वा कथमागमः॥ इति कात्स्न्र्येन वृत्तांतमात्मनो वक्तुमर्हसि॥५३॥ इति पृष्टं क्षिती
शेन बहुमानपुरस्सरं॥ क्षणे बुध्वाऽनुसंधाय मुक्तो वक्तुं प्रचक्रमे॥५४॥ रेवविंध्याटवी
तावत्तव श्रुतिपथंगता॥ पूर्वाऽपरपयोराशिवेलासंस्पर्शशालिनी॥५५॥ यदेकदेशेकं
दूलगंडे मदलितद्रुमे॥ उषितोहं दंडकारण्ये ससीतो रामलक्ष्मणौ॥५६॥ यत्रागस्त्यमुनेरा
सीदाश्रमः शमिनो मतः॥ लोपामुद्राकराक्षिप्तजलसेववर्द्धितद्रुमः॥५७॥ तस्योपकंठे पं
पाख्यमस्ति पुण्यजलं सरः॥ सीताकरात्तलोल्लूनभ्र वर्ण्यमर णोत्पलो॥५८॥ तस्याऽस्ति

6

पश्चिमे तीरे जीर्णः शाल्मलिपादपः॥ आरोहपरिणाहाभ्यां व्याप्तव्योमदिगंतरः॥५९॥
तस्मिन्कृतकुलाया ये निवीतभीतिनिर्दुर्गमे॥ विहंगमसहस्राणि निवसंति निरंतरं॥६०॥
दिवा तान्यपि निर्गत्य प्राणयात्रामितस्ततः॥ आगत्य स्वनीडेषु सुखं रात्रिषु शेरते॥६१॥
तत्रैव वृद्धवसती अभूतां पितरौ मम॥ जातोहमेकस्तनयो ययोर्वयसि पश्चिमे॥६२॥ उ
ड्डीतुमसमर्था सा तीव्रां प्रसववेदनां॥ तथैव पंचतां नीता जननी मे दुरात्मनः॥६३॥ जाया
विरहदग्धोपि पिता पुत्रेषणातुरः॥ शोकमुत्सृज्य मन्त्राणि पोषणे यत्नमयहीता॥६४॥

राम
६

नशशाकक्किंचिदनुष्ठातुमात्मनः प्राणवृत्तये ॥ मांवक्षसि निधायास्तनीड एवदिकानिशं ।
।अन्यापत्ररथानी ।तन्तुक्षोज्झितफलांबुना ॥ मदाप्यायनशिष्टेनसोकरोद्वृत्तिमात्मनः
॥६६॥ अतिक्रामति कालेऽथकिंचिदुड्डिन्नपक्षतौ ॥ तातवत्सस्थलस्थेपिमय्युड्डायनलाल
लसे ॥६७॥ अकस्मादेवसंभ्रांतमृगापद्धिकुलक्ष्रुतः ॥ अभूत्कलकलस्तस्मिन्नरण्येयम
डुंडुभिः ॥६८॥ ततस्तातोरसः किंचिदुन्नमय्यशिरोधरां ॥ कुतूहलवशाच्चक्षुर्दिक्षुविक्षि
प्तवानहं ॥६९॥ अथाऽपश्यमसंख्यातकिरातपरिवारितं । वनेशवरसेनान्यमायांतंमृगयारसात् ॥७०॥

३ सस्मन्नौकः

ततःपीतमिवात्मानमुत्तवातमिव शाल्मलिं॥ परिवृत्तमिवारण्यं मन्येनाऽहंमतं कियँ॥७१॥ ह
तग्राणि सुहस्तोघैः स्रवद्रुधिरचर्चितैः॥ मुहूर्त्तोद्विवतद्याधैस्तदूर एपमशृ[illegible]र्यत॥७२॥
सेनापतिस्स निस्त्रिंशो मृगयाजनितश्रमः॥ निषसाद ततः पेपा सरसस्तीरशाद्वले॥७३॥ स्फु
णं क्षिप्रमपीपीत्वापःप्राप्य वालमृणालिकाः॥ पुलिंदैः सह सेनानीस्सुजगाम यथागतेः॥७४॥
एको ऽरत्पुलिंदस्कृपापस्तत्र विलेवितः॥ प्रांशुमन्येयं कराकारः कृतांतस्येव किंकरः॥७५॥
अज्ञात पिशित प्राप्तिरनुरक्तत्वृणाश्रमः॥ यमहृतीमिवहर्षांसदृष्टौ तत्र शाल्मलौ॥७६॥

अध्यवसाय उत्साहः।

सदुरारोहतां तस्य ज्ञात्वापि महातरोः जाताऽनध्यवसायो पि यत्नमारोहणेऽकरोत्॥७६॥
ततो हमसमत्रासविपर्यासितमानसः॥ अविशं पितुरुत्संगं तत्पक्षावृतविग्रहः॥७७॥ सदु
पापस्तमारुह्य तरुं नीडनिवासिनः॥ हत्वा हत्वा यथाशक्ति शुकान् भूमावपातयत्॥७८॥
क्रमेण स दुराचारस्तातस्यापि शिरोधरां॥ बभंज तं च छिन्नपक्षिनो विगतजीवितं॥७९॥ तात
हा मम न तच्छोको नाल्किं क्व न चेतसि॥ केवलं सहजातेन भयेनैवाऽस्मि विप्लुतः॥८०॥ ततो
ऽहं पितुरुत्संगाद्विनिर्गत्य ससाध्वसे॥ अंतरे तरुपत्री पर्णानां पर्णानांत्वर्णमाविशं॥८१॥ पा

सभयैस्यथा तथा

प:सो प्याव रुह्याऽधः शाल्मलेर्मूलवत्तिनिनाश्रुका नातास्त्ना द्याय व्याधान्नु संरक्षगात्॥८३॥
अहं विधिनियोगात्तु तेन दुःष्कृतकारिणा॥ जीर्णपर्णस्रवर्णत्वात्रवर्तानोना वधारितः॥८४॥
ततो हरमतिक्रांते तस्मिन्दारुणकर्मणि॥ संजातजीविताशांमो पिपासापर्यवाधयत्॥८५॥
अनुड्डयनसामर्थ्यात्पङ्गुमेव यथा तथा॥ घंपाङ्कलिनपर्यंतं गंतुमेक्षे पिपासितः॥८६॥
तथा पथि निरुत्साहः पतन्मुकुलिते क्षणः॥ तमेव पापकर्माणं शंकमानः पदे पदे॥८७॥ वि-
रंहाता ततातेतिशो वन्द्धैवांतवर्त्तिनिभा प्राणैरायास्यमानोहमतिष्ठमति निष्ठुरः॥८८॥

तस्मादनतिदूरेऽस्य सरसस्तपसां निधेः ॥ निर्द्धूतक्लेशजालस्य जाबालेराश्रमो मुनेः ॥८१
ततस्तस्य सुतस्तस्मिन्सरसि स्नातुमागतः ॥ हारीतनामा मां तत्र तदवस्थं व्यलोकयत् ॥८२॥ कष्टे
केनापि पापेन पातितः शुकबालकः ॥ कुलायाद्वा प्रपतितो सेव कृपया मां करेऽग्रहीत् ॥८३॥ अपा
ययत्पयोबिंदून्स्नात्वाश्वासयन्मुहुः ॥ कृताह्निकश्च कारुण्यान्नयत्पितुराश्रमे ॥८४॥ समाश्व
स्तस्य हारीततातं दृष्ट्वैव पश्यतः ॥ पदं स्थिरमिव न्यस्तं हृदि मे जीविताशया ॥८५॥ नीडच्युतोऽय
मानीतो मया विहगपोतकः ॥ इति पित्रे प्रणम्याऽसौ पाणिस्थं मामदर्शयत् ॥८६॥ अथ जाबा
लिमद्राक्षं साक्षादिव पितामहं ॥ महात्मभिः परिवृतं सानुकंपैस्तपोधनैः ॥८७॥ जटाधवलश्म

सर्वे मुनयस्तमपृच्छन् । वत्सः कोयं भगवान् जन्मांतरे किमस्य वा दुश्चरितं तदुच्यतां ॥९५॥ अस्य द्विजो मुनिस्त्रिरस्य
नु वक्ष्यमाणस्तानब्रवीत् कुतूहलेनावदद्धृत क्रियाः स्वाया पं क्लि ४

१

दीनं ध्याम्नाप्रसरतां वहिः ॥ अनतिस्फुटसंलक्ष्यशरीरावयवाकृतिं ॥९६॥ स तु मां लक्षणमुद्वीक्ष्य
स्मयमान इवाऽब्रवीत् ॥ इदं हि भुज्यतेऽनेन फलं स्वस्यैव कर्मणः ॥९७॥ त्रिकालदर्शी भगवान्स हि
दिव्येन चक्षुषा ॥ विश्वं पश्यति पाणिस्थं करस्थामलकं यथा ॥९८॥ वचस्तदाकर्ण्य कुतूहला
कुलास्समेत्य सोध्यं विधाय विधिमस्खलितावधानमाकर्णयिषव कथां ह्युमे तदीयो ॥९९॥
उक्तास्तथा भगवता मुनयो निजेन कर्मक्रमेण दिवसांगमयो बभूवुः ॥ हारीतहस्तनिहितेन मनो
विनोदैस्तैस्तैरनीयत मयापि दिनावशेषः ॥१००॥ ॥ इति श्रीमज्जयंतसूनोरभिनंदस्य कृतौ
कादंबरीकथासारे प्रथमः सर्गः ॥१॥ ॥श्री॥ ॥छ॥ ॥

राम
९

॥ ॥अथ सोध्यात्मसमाध्यंतात्समाप्य पुनयः क्रियाः॥ शुश्रूषवस्तमागम्य यथास्थान
मुपाविशन्॥१॥ अहमप्यात्मवृत्तांतविस्तारश्रवणोत्सुकः॥ सेहत्यचापलं सर्वमास्थिरम
नास्तचेष्टा॥२॥ दुग्धाब्धिजलकल्लोलधवलैरमृतोक्षितैः॥ सिंचन्निव करैरिंदुरुद्गादस्म
मस्थलीः॥३॥ भगवानथ जाबालिः सुखासीनः स्वविष्टरे॥ वल्कलाहितपर्यंकवेधो वक्तुं
प्रचक्रमे॥४॥ सर्वैर्दत्तावधानास्थ शृणुते मां तपोधनाः॥ अमुष्यष्वर्वृत्तांतप्रस्तावोपक्षितां
कथां॥५॥ अस्त्यवंतिषु संसारलक्ष्म्याः प्रसवभूरिव॥ निधिरुज्जयिनी नाम नगरी गुणसं

२ एकाग्रचित्ताः

पदौ॥६॥लंकाऽलकाऽमरावत्यो येषां वसतयः प्रियाः। ते प्रियामपि पश्यंतः सुखं तासु न
शेरते॥७॥यस्यां किमन्यत्कैलाससन्निवासरसमुत्कूता॥ महाकालाभिधानेन रुद्रेणाध्य
यमास्यत॥८॥ यस्यां नरतमो धात्वं नागीरथदृधूपमः॥ तारापीड इति श्रीमान्बभूव
पृथिवीपतिः॥९॥ परस्परविरोधेन विप्रकीलैरितस्ततः॥ विस्रब्धमास्यते यत्र संभूय कु
शलैर्गुणैः॥१०॥ विहसन्बुद्धिविभवैर्मृस्द्धवबृहस्पतीन्॥ अमात्यः शुकनासाख्यो ब्रा
ह्मणस्तस्य चाभवत्॥११॥ त्रिविक्रमवदाक्रम्य स राजा पृथिवीमिमाम्॥ तस्मिन्मंत्रिणि

10

तद्वारं निश्चिक्षेप नरस्तमे॥१२॥ तथा च पालयामास स मंत्री सकलाः प्रजाः॥ यथा त्रिवि
धमप्येता न दुःखं किंचिद स्पृशत्॥१३॥ यथा यथा चलो कोऽस्मिन्नितरा वा नुरज्यते॥ राजा
तथा तथात्मानं कृतकृत्यममन्यत॥१४॥ अक्लेशमर्पितं तेन स्वच्छंदेनागदर्शिना॥ संभोग
विघ्नकारित्वपालनं मेत्रिसात्कृतं॥१५॥ कृतकृत्यतया चासौ कार्यशेषमचिंतयत॥ विष
येषाहितप्रीतिरासौ वक्रे यथा सुखम्॥१६॥ शोभाहिकृतत्वत्तस्य राज्ञो भोगविभ्रत
यः॥ असमाप्तं गीषस्यताए वनुविडंवनाः॥१७॥ स युवा मधुराकारतरुणीनयनोत्सव

कवीलासुकृप्रालःकामीभुञ्जेभोगसंपदः॥१८॥नतेभावानतांक्रीडानतागोष्ठ्योनतेरसाः॥
नतेविलासायत्रास्यपारगंनाऽन्वभूत्सह॥१९॥समयसुखसंभोगम्भूमिन्नोपिसम्प्रतिः॥दु
खमेकेतुनाऽज्ञासीदपत्यालोकनोद्भवं॥२०॥यथायथाचकालेनव्यतीयायनवंवयः॥अ
नपत्यतयाशोकोवद्धतेस्मतथातथा॥२१॥सुखमभूतावसर्वेस्मिन्नंतःपुरकदंबके॥राज्ञी
विलासवत्याख्यायस्यप्राणसमाऽभवत्॥२२॥साराज्ञमहिषीगौरीमभ्यर्चयितुमेकदा॥
देवतायतनंवाह्येययौभर्तुरनुज्ञया॥२३॥पुराणेवाच्यमानेतुप्रसंगात्पतितोश्रुतिः॥अ

राम
२२

४ नाट

पुत्रस्य कुतो लोक इति सुत्वाथ तत्र सा ॥२४॥ प्रतप्तलोहसूचीव साश्रुतिः श्रवणांतरं ॥ विवेश
दधती तस्याः परां कामपि वेदनां ॥२५॥ ततः प्रतिनिवृत्ता च प्रविश्य च वनं निजं ॥ वस्त्रावृत
मुखी भूमावुपविश्य रुरोद सा ॥२६॥ सखीभिः प्रार्थ्यमाना सा न स्वामिन्न जतास्थितिं ॥ नोदुः
खात्कन्दमाहारं किरामनरोदं ॥२७॥ अथोप[illegible]लन्यात त्वीडावार्त्तां परिजनान्नृपः ॥ प्रविश्यांतः
पुरं प्राह स्वैरमेनां प्रसादयन् ॥२८॥ प्रिये किमिदमारब्धं रुद्यते किमकारणं ॥ न च या मत्कृतो मन्यु
रनुभूतः कदाचन ॥२९॥ अन्योपि मत्सुखापेक्षी मदधीनात्मजीवितः ॥ कस्तवोत्पादयेन्मन्यु

यस्मै कुप्यसि सुंदरि ॥२०॥ इति प्रसाद्यमाना सा यदा नोवाच किंचन ॥ तदावेदित[illegible]त्तांतस्तत्स
ख्यान्नृपतिः कृतः ॥२१॥ तेन व्रतिकरेणाऽथ सो पि दुःखपरायणः ॥ रुरोद वह्नसि न्यस्तसवा
ष्पदयिता सुरक्षा ॥२२॥ चिरं रुदित्वा निःशब्दं स्वयमुन्मृज्य लोचने ॥ उवाच गद्गदं राजा महिषीं
मुपसर्प्य ताम् ॥२३॥ ममापि नास्ति यं देवि विरात्सम्प्रति दुस्सहा ॥ दुनोति हृदयं चिंता निःप्रती
काररोगवत् ॥२४॥ विफलं व्रतमे राज्यं विफला मम संपदः ॥ विफला मम संभोगा विफलं मम
जीवितं ॥२५॥ कुतोस्माकमनागयानामियत्यो नागपसंपदः ॥ यदद्यामस्त्वोत्संगे बालकाप

त्यमंडितं ॥३६॥ वोंछन्क्रीडनकं किंचिक्किमप्यव्यक्तमालपन् ॥ आरुह्यति सुतः क्रोडं कदा
मे पापकर्मणः ॥३७॥ इत्यादि विलपत्यस्मिन्नुवाष्पाकुलितलोचने ॥ शुकनासइमां वार्त्तां ज्ञाचा
सत्वरमाययौ ॥३८॥ निरपत्यः कृतस्मोपिराजेव हतवेधसा ॥ तस्याप्यनेनशोकेन गृहे रोदिति
गेहिनी ॥३९॥ मत्वापि गतं दुःखं दुःखमित्यवधारयन् ॥ तद्दुःखापनयोपायप्रवणो धीरम
ब्रवीत् ॥४०॥ क्वधीरप्रकृतिर्देवक्केयं विक्लवचित्तता ॥ शोकोऽवकाशं लभते हृदये न भवादृशां
॥४१॥ यदैषा हि स्त्री स्वभावेन देवी विक्लवतां गता ॥ तत्किं प्रलंबकूर्चस्य युक्तं देव प्ररोदनं ॥४२॥
कोयं हिताहितप्राप्तिपरिहारक्रियाक्रमः ॥ यत्कपोलतलस्यन्यस्तहस्तो निश्वस्यते चिरं ॥४३॥

13

यदिदुःखस्थितिः सत्यमनपत्यतया तव ॥ बुद्धिराधीयतां धर्म्मे धर्म्मात्सर्वमवाप्यते ॥४४॥ दायतां
वस्तु विप्रेभ्यः पूज्यंतां सर्वदेवताः ॥ प्रवर्त्यंतां प्रपारामाः खन्यंतां सलिलाशयाः ॥४५॥ नास्तिनाम
जगत्यस्मिन्पुरुषार्थस्य कश्चन ॥ यो धर्म्मनिरतैर्द्धीरैस्तादृशो नाधिगम्यते ॥४६॥ इत्यादि शुक
ना सोक्तमाकर्ण्य विगतज्वरौ ॥ ~ उभ्यायस्वस्थवत्सर्वदंपती चक्रतुः क्रियाः ॥४७॥ ततः प्रभृति
दानानियागहोमतपांसि तौ ॥ चित्रा एपकुरुतं सद्वीयस्य यंततः प्रजा ॥४८॥ कदाचिदपि
भूपालः स्वप्ने पश्यन्निशाकरम् ॥ विलासवत्या वदने प्रविशंतं मखंडितं ॥४९॥ तथा मनोरमा
नाम शुकनाशस्य गेहिनी ॥ स्वप्ने सपुंडरीकां कां सापि तेनवलोक्यत ॥५०॥ अन्येद्युरुदये ना

राम
२३

नोर्मंगलाचारपूर्वकम्॥ तं स्वप्नं कथयामास शुकनासाय भूपतिः॥ ५१॥ सानंदं सोऽन्यथा दे-
वं से पूर्णास्ते मनोरथाः॥ अचिरात्सोष्यते देवी पुत्रं पूर्णेन्दुसुंदरं॥ ५२॥ दिनेष्वथ व्यतीतेषु के-
षुचित्सगर्भमग्रहीत्॥ महिषी तत्सखीभ्यश्च तमज्ञासीन्नरेश्वरः॥ ५३॥ तान्यः प्रासादात्सवासां॰
सिचित्राण्याचरणानिव॥ क्रमेण गर्भलिंगेषु व्यक्तेषु सुदतेतराम्॥ ५४॥ शुकनासाय चोवाच।
प्रहर्षोत्फुल्ललोचनः॥ सकोह्य चातकोमे[illegible] घानिव प्रसववासरान्॥ ५५॥ अथान्येऽप्यदशमे मासे
देवी पुत्रमसूत तम्॥ हर्षेण च जगत्सर्वं परिहृत्तमिवाऽभवत्॥ ५६॥ राजा महोत्सवानंदपूर्ण-
पात्रमुदाहृते॥ दृष्ट्वालोके शुभा तिस्मन्नात्रिविक्रमवर्तिषु॥ ५७॥ शुकनासस्य राजा नैकेवेज्ञ

मा

याह निर्झरं॥ औत्सुक्यात्स्मृतिकावासं तावुभावपि लग्मतुः॥ ५८॥ ततो ददृशतुर्व्यक्तसक
लांगकं रके॥ इंदोरूदयरागार्द्रं न वेविंबमिवैंदवं॥ ५९॥ शुकनासोनिरूप्यांग मेकैकं नि
पुणं शिशोः॥ हस्तेन्मृपालमालं व्यहर्षगर्भमभीषत॥ ६०॥ अयं शंख इदं चक्रमिदं मारवेडम
च्छुडे॥ यस्य बालस्य चिह्नानि दृश्यंते चक्रवर्तिनो॥ ६१॥ यो ऽसौ स्वप्ने त्वया दृष्टश्चंद्रो देवी
मुखे ऽविशत्॥ स एवा ऽयमिहोत्पन्न मितिमा संशायं कथाः॥ ६२॥ इति तद्दर्शनानंदसुधा
प्लावितयोस्तयोः॥ शुकनासं गृहाद्दूतः सुतोत्पत्तिमथ्यधात्॥ ६३॥ शुकनासमथो हारमा
लिलिंग महीपतिः॥ उत्तरीयं च हारा ऽस्य पूर्णपात्रमिति स्वयं॥ ६४॥ उवाचैनं पश्येदं सुखस्यो

चै

परिनःसुखम्॥ इमेते पतिताः सत्यंतुहिन्ने सोमरस्मयः॥६५॥ माभिदंवेधसारज्ञेचिंतातुउ
मावयोः॥ सहैवपात्रतो [illegible]नीतोयदावांसुखदुःखयोः॥६६॥ ततस्तूर्यरवैर्न्नित्यंचर्चरी
तालनिस्वनैः॥ सिंदूरघनसारादिक्षोदैःकुंकुमकर्द्दमैः॥६७॥ अनपोहितनीचोच्चव्यवहार
निरर्गला॥ केलिःप्रवर्त्ततेतत्र राज्ञोगेहेमहोत्सवे॥६८॥ राज्ञातुस्वगृहेकेलिविमर्द्दंवीक्ष्य
तादृशं॥ शुकनासगृहंगत्वा द्विगुणंतमकारयत्॥६९॥ कृतेऽथजातकर्मादौ वृत्तेषष्ठीप्र
जागरे॥ विलासवत्यांस्नातायां शुचौकालउपस्थिते॥७०॥ प्रशस्तेऽहनिदैवज्ञैरनुज्ञातो
महीपतिः॥ स्नातःसुवर्णसदसो पूजयित्वाद्विजोत्तमान्॥७१॥ सभूषणानिवासांसिवर्षन्

15

परिज्ञने शिशोः॥ चंद्रापीड इति स्वप्नसदृशं नाम निर्ममे॥७२॥ शुकनासोऽपि संहृष्य विप्र
च्चिप्रजन्मोचिते॥ वैशंपायन इत्यात्मसूनोर्नाम प्रशातिवान्॥७३॥ क्रमेण वर्द्धमानोऽथ कृत
चूडादिमंगलः॥ चंद्रापीडोऽभवत्पित्रोः परमुत्संगमंडनं॥७४॥ आकारेणेंदुतुल्येन मधुरै
र्वलिवाल्लितैः॥ अव्यक्तवर्णैरालापैरहरत्सततयोर्मनः॥७५॥ प्राप्तेऽथ सप्तमे वर्षे विधाय गृहम
कारयत्॥ चंद्रापीडस्य नगराद्वहिर्वद्रगुणं नृपः॥७६॥ कृतोपनयनं चैनं काले तत्र जनोवि
ते॥ तत्र न्यवेशयद्राजा विद्याधिगमसिद्धये॥७७॥ तर्कव्याकरणाभिज्ञान्धनुर्वेदविशारदा
न्॥ दंडनीत्यादिनिपुणानाचार्यान्पर्यकल्पयत्॥७८॥ शुकनासोऽपि तं पुत्रमुपनीय यथाविधि।

राम

राजपुत्रांस्तांश्चक्रे विद्यागृहनिवासिनम्॥७९॥नृपतिस्त्वागमद्द्रष्टुं पुत्रं गुरुगृहे स्थितं।प्रा
र्थितोपि सतन्मात्रा नैनमानाययत्गृहे॥८०॥वर्षे षोडशवर्षस्क राजपुत्रः कुशाग्रधीः॥सकृ
दध्यापितो विद्याः सर्वान्यस्ता इवाग्रहीत्॥८१॥सर्ववादिषु वक्ताभूत्सर्वशास्त्रेषु कोविदः॥प्रौढः
कलासु सर्वासु दक्षस्सर्वेषु कर्मसु॥८२॥सर्वेसंव्यवहारेषु सोभूदस्खलितक्रमः॥सर्वशास्त्रा
र्थतत्वज्ञस्सर्वभाषासु सत्कविः॥८३॥क्रमेण वर्द्धमानश्च स व्यायाममसेवत॥सुक्ष्मेच तदभ्या
सात्प्राप्तसर्वांगसौष्ठवः॥८४॥प्रलंबबाहुः पीनांसः पृथुवक्षा स्तनूदरः॥गंभीरनाभिर्वृत्तोरुस्तरु
णः करिसद्गतिः॥८५॥स्तु कनासस्तु तस्तस्य प्रतिबिंबइवाभवत्॥गुणैरशेषैरन्यत्र शरीरसौंद

बल

16

अश्वांतरासुलक्षैः ३
४ वलाहकेन

गौरवात् ॥८६॥ अथ राजा सुतं बुद्ध्वा कृतार्थं गुरुवेश्मनः ॥ शुकनासगिरा गेहमानेतुमुपचक्रमे ॥८७॥
स वलाहकनामानमाहूय ध्वजिनीपतिं ॥ पुलेपऽङ्गिआहिणो त्पुत्रमानेतुं कृतमंगलः ॥८८॥ तथेंद्रायुध
नामानं प्रेषयामास वाजिनं ॥ जितोच्चैःश्रवसं तैस्तैरनन्यसुलभैर्गुणैः ॥८९॥ सहस्रै राजपुत्राणां
विनीतं वाङ्कुशालिनाम् ॥ व्यसर्जयच्च तेनैव सह पुत्रानुवर्तिनो ॥९०॥ वलाहकस्ततो गत्वा विद्याग्ट
हकृतास्पदं ॥ अद्राक्षीद्राजपुत्रं तं प्रणनाम च सादरं ॥९१॥ आचचक्षे स राजाज्ञां गृहमागम्यता
मिति ॥ स नामग्रहणं चास्मै राजपुत्रान्न्यवेदयत् ॥९२॥ ततो वलाहको ख्यातशौर्यादिगुणगौ
रवाः ॥ राजपुत्राः ५ प्रणेमुस्तं पुरुहूतमिवाऽमराः ॥९३॥ पर्यांणरत्नज्योतिर्जितेंद्रायुधमग्रं

पलान १

तारापीडस्य २

इंद्रायुधं प्रवेश्याथ पुनराह बलाहकः ॥९४॥ इममारोह सिंधूत्थमश्वरत्नमयोनिजं ॥ पारसी
काधिपतिना देवस्योपायनीकृतं ॥९५॥ चंद्रापीडस्ततो वीक्ष्य तुरंगममनुत्तमं ॥ परं विस्मयमापे
दे चिरं चैवं व्यचिंतयत् ॥९६॥ हृदयं मे ब्रवीतीति नैष सत्त्वं तुरंगमः ॥ कोपि केनापि पापेन नूनं तु
रगतां गतः ॥९७॥ अयोनिजश्च वाग्नेयमेतदुक्तात्र साक्षिणी ॥ रंभा किलाप्सरः कन्या शापेन वड
वाऽभवत् ॥९८॥ गरुत्मतीदस्युच्चत्रसुश्चैःश्रवसि वा भवेत् ॥ तेजसा माकृतिवापि न सामान्येषु
वाजिषु ॥९९॥ इति बुध्वा विकल्प्याथ बलाहकसमर्पितैः ॥ कुसुमस्रगलंकारदुकूलैः कृतमंग
लः ॥१००॥ गुरूनामंत्र्य दत्ताशीर्ब्राह्मणैर्वीक्षितस्ततः ॥ वैशंपायनमारूढमालोक्य तुरगोत्तरम् ॥१०१॥

यो सि सो सि नमस्कृत्य मारोहातिक्रमस्त्वया ॥ मैथिलीयोऽयमस्माकमारुरोहेति तं वदन् ॥ ३ ॥ स
इंद्रायुधमारुह्य वैनतेयमिवाऽच्युतः ॥ अपि त्रिजगतीकृत्स्नां मेने हस्तगतामिव ॥ ३ ॥ स वैशंपायन
स्सौधनिर्गत्य भवनात्ततः ॥ राजपुत्रैः परिवृतो विवेश नगरीं ततः ॥ ४ ॥ तमथ पुरतरुणपौराजनमा
र्गेणायांतं ददृशुरतुलकांतिं सौधवातायनस्थाः ॥ व्यपगतगुरुलज्जा सत्रमोत्कंपितांगाः स्मर
जनितविकारैर्लोचनैरञ्चयंत्यः ॥ १० ॥ ॥ इति कादंबरीकथासारे द्वितीयः सर्गः ॥ ॥ २ ॥ ॥
॥ स प्राप्य नृपतिद्वारमवतीर्य तुरंगमात् ॥ राजधानीं ससेनानीस्सवैशंपायनोऽविशत् ॥ १ ॥
प्रविश्य च सभामध्ये हर्षबाष्पार्द्रचक्षुषः ॥ न्यस्तजानुः क्षितौ मूर्द्ध्ना ववंदे चरणौ पितुः ॥ २ ॥ आ

राम

भारती४

लिलिंग सुतं राजा चुचुंब शिरसि क्षणं॥ ग्रहीतुमैच्छदुत्संगे स तु नम्रः समुपाविशत्॥३॥ इत्थं पुनः

पुनः प्रहृष्टमनसा तेनापि स्नुषुजः॥ विसृष्टोऽथ सुहृत्स्थित्वा मातरं वंदितुं ययौ॥४॥ तां सुतालोक

नानंद स्फुरत्क्षीर पयोधरां॥ प्रणम्य जननीस्सर्वान्नंदयामास वंदनैः॥५॥ अभिनंद्य कृतं ताभि

रवतारणमंगलं॥ शुकनाससमथ द्रष्टुमायासीत्तस्य मंदिरं॥६॥ द्वारि वाजिनमुत्सृज्य प्रविश्य

प्रश्रयेणातौ पितृवत्प्रणनामाऽसौ मौलिना मेदिनीस्पृशा॥७॥ नमंतमेनमुत्थाप्य स्वयमुत्थाय

सादरं॥ शुकनासस्तु जयाह्वकं वेपुलकितानन॥८॥ कृतयत्नोऽपि नाध्यास्य चारुचामीकरासनं

चंद्रापीडः क्षितावेव तस्य न्यविशताग्रतः॥९॥ शुकनासोऽवरुद्धं च तमासने स्वे न्यवारयत्॥ तत्क्षणा

18

मिव स्थित्वा द्रष्टुं प्रागान्मनोरमो ॥२०॥ सप्रश्रयं प्रणम्याथ तां विलासवतीमिव ॥ ततोऽवाप्य विचि
त्राशीर्मंगलो निरियाय सः ॥११॥ चंद्रापीडस्य याहृद्यो दर्शनालिंगनक्रमः ॥ स वैशंपायनस्या
पि ताहृ[illegible]गेव[illegible]गृह हृद्ये ॥१२॥ न कश्चन सुतस्नेहविशेषश्च तयोः स्मृतः ॥ मंत्रि[illegible]
[illegible]णो राजपुत्रे वा मंत्रिपुत्रे नृपस्य च ॥१३॥ सर्वोपिकरणोपेतं पित्रा प्रथैव प्रकल्पितं ऽगा
मच्चंद्रापीडोऽथ कुमारभवनं महत् ॥१४॥ सुसन्निवेशमालोक्य तत्र रेमे चिराय सः ॥ क्षिति
मिंद्रायुधस्यापि त्ववासे यथकल्पयत् ॥१५॥ ततः स्नातानुलिप्तांगं कृताहारं सुखस्थितं ॥ मात्रा
विसृष्ट आगत्य कंचुकी तमभाषत ॥१६॥ इयं हि पत्रलेखाख्या कौवेजेश्वरकन्यका ॥ केनापि दे

राजमंत्रिणो ३

राम
१८

वयोगेन परिभ्रष्टा पितुर्गृहात्॥१७॥ बालेव वर्द्धिता देव्या स्वयमेतं पुरे निजे॥ योग्या सकलविस्रं
भम्रमिस्लेपार्श्ववर्तिनी॥१८॥ मयैवेति देव्या प्रहिता कुमार प्रतिगृह्यतां॥ इत्युक्तोपाहरत्कन्यां वि
नीतां प्रियदर्शनां॥१९॥ सानुतेनार्पिता कन्या ततः प्रभृति तेन तथा॥ असेवत यथा चासौ चिरं चित्रमिवा
न्नवत्॥२०॥ चकार तां च तां बूलकरंडस्याधिकारिणीं॥ तुतोष च गुणैरस्याः शीलाचारनयादिभिः
॥२१॥ कियत्स्वपि व्यतीतेषु दिवसेष्वपि पार्थिवः॥ यौवराज्यविधौ सूनोः संविधानमसिश्रियत्॥२२॥
सेकमंत्रमसुकनासेन सह विस्रंभनिर्भरं॥ संभारसंग्रहारंभमकरोत्कृतमंगलः॥२३॥ सन्निकृष्टाभि
षेके च दर्शनार्थमुपागते॥ चंद्रापीडमथोवाच शुकनासः सविस्तरं॥२४॥ तात विज्ञातशास्त्रस्यापि

नयाचारशीलिनः॥ नाल्पमप्युपदेष्टव्यमस्थिस्थिरमतेस्त्वया॥२५॥ किं तु लोकनरालक्ष्मीरभि
राममिदं वचः॥ नवं वयः पराशक्तिरिति दुर्विषहो ज्वरः॥२६॥ लक्ष्मीत्र्योमहज्वरः पुंसामन्यथाभाव
कारणं॥ विरलास्ते विकारायनयेषां नत्परिग्रहः॥२७॥ पुष्णाति तीक्ष्णमूर्च्छालोहिनस्ति कण्ठकवा
दिनो॥ करोति भक्तविद्वेषमसमः श्रीकृतो ज्वरः॥२८॥ न पश्यंति नश्यएवे तिनापेक्षंते हिताहिते
न वियः किं विचेष्टंते कष्टं श्रीविप्लुता नराः॥२९॥ क्रमागतो न चैतस्यामाश्वासः कोपि विद्यते
॥ ह्योपि यत्रोषिता लक्ष्मीस्तत्राद्यैव न दृश्यते॥३०॥ वातरक्ताभिभूतेव भिन्नपादेव कंटकैः॥ लक्ष्मी
र्विधातुं शक्नोति न क्वचिन्निर्भरं पदं॥३१॥ श्रीस्सपत्नीमिवद्वेष्टि हृष्टा हि सत्यप्यवस्थिनी॥ तो विना

१९

एम
५
२९

सचिकेमंत्रिलम्र्वः २

यत्र तत्रैव पतंतं धाडवेश्वराः॥३२॥ सत्य धर्मस्योपदेष्टारस्तेषां प्रविरलानराः॥ धूर्तैरतेहि मुञ्जे
ते हृदयानुप्रवेशिभिः॥३३॥ आपातरमणीयेषु विषयेषु निरर्गलं॥ तैरेव हि प्रवर्त्यंते सुखमा
त्रं पंडितैः॥३४॥ धूर्तप्रतारितास्तेव विषयासक्तचेतसः॥ अकस्मात्प्रलयं यांति गीतिरक्ताम्
गा इवा॥३५॥ विषयेष्वतिकष्टोयं विषयस्तीतिनाभयः॥ जीवत्यन्यैः किलाकृष्टस्तेनाकृष्टो नजीव
ति॥३६॥ खलेषु हृतवित्तं मोविषयेषु निमग्नधीः॥ साधुष्ठु निमतो नित्यं महतीं श्रियमश्नुते॥
॥३७॥ सत्वं नवंचसे धूर्तैर्न साधुभिरुपेक्ष्यसे॥ यथा न बाध्यसे कामैः प्रयतेथास्तथा तथा॥३८॥
कामं नवान्प्रकृत्यैव धीरः पित्रा वसंस्कृतः॥ त्वद्गुणेष्वपि संतोषो गुरवः कुरुते स्म मां॥३९॥ द्रुवरा

वावालसानुपदिशति १

न्धुरंपित्राकल्पितांयुद्धहन्मस्थिरो॥विजितामपिचानेनभुवनंजेयवसुंधरा॥४०॥इत्युक्त्वाविररामासो
तकल्याणपरायणः॥चंद्रापीडस्ततस्ताभिरलंकृतइवाऽभवत॥४१॥अथपुण्येऽहनिस्नातंविधिवत्स्व
कृतमंगलं॥यौवराज्येप्रियेपुत्रमभ्यषिंचन्महीपतिः॥४२॥अभिषेकोत्सवस्तस्यजन्मलाभोत्सवाद
पि॥अधिकस्सर्वलोकस्यबभूवानंदवर्धनः॥४३॥सर्वाभ्योदिग्भ्यआजग्मुर्गृहीतोपायनानृपाः
द्विजाश्चतुष्टुःप्राप्तगोभूकनकदक्षिणाः॥४४॥अन्यत्राऽहनिदैवज्ञःश्लाघ्ययोगगुणान्विते।
ददौदिग्विजयेयात्रांयुवराजेनृपाज्ञया॥४५॥कृतप्रस्थानहोमोऽसौविधिज्ञेनपुरोधसा॥शस्त्राऽस्त्र
चक्रमभ्यर्च्यशास्त्रोक्तैर्मंत्रविस्तरैः॥४६॥गीतस्वस्त्ययनोविप्रैःप्रचुरस्वर्णतोषितैः॥यत्नरुद्ध

क्षको मात्रा कृतप्रस्थानमंगलः॥४७॥ शंखदुंदुभिनिर्घोषमुखरीकृतदिङ्मुखः॥ स्कृतस्तारप
त।द्धिश्चसूतमागधवंदिभिः॥४८॥ स्रग्विलेपनधूपादिसंभाराश्चितदैवतः॥ पितरोभ्युकना संवप्र
णम्य निरगात्स्वगृहात्॥४९॥ इंद्रायुधमथारुह्य पौरजानपदाशिषः॥ शृण्वन् नगर्याः पूर्वेण द्वारे
ण निरियाय सः॥५०॥ ततोनुगम्यमानोसौ बलाहकनिवेदितैः॥ सहस्रसंख्यैः क्षितिपैः स्फुरत्सच्छ
त्रचामरैः॥५१॥ वैशंपायनमेकत्र पार्श्वेश्चिताश्ववर्त्तिनं॥ अन्यत्र पत्रलेखाख्यां पश्यन्नश्वतरी
स्थितां॥५२॥ तस्मिन्नहनि सल्लोकं प्रस्थायोच्छ्रिततोरणं॥ चित्रं निवासमध्यास्त द्राक्कद्राकूलेप्र
कल्पिते॥५३॥ अथाऽपरेद्युरुत्थाय याऽशेषामरएन्द्रूषितः॥ प्रावर्त्तत प्रबंधेन प्रस्थानुमनुलोपमं॥५४॥

पीडयन्निव सैन्येन पातालतलवासिनः ॥ रजसा च तदुत्थेन स्थगयन्नगतं गगनस्थितान् ॥५५॥ नम
यन्ननतान्नम्रपानानतान्परिपालयन् ॥ अवष्टब्धुत्खनन्कांश्चिदुत्खातान्प्रतिरोपयन् ॥५६॥ विश्वा
सयन्नविश्वस्तान्संरक्षन्नुशरणागतान् ॥ शत्रुंस्तु सादयन्दंडैस्साधूंस्संमानयन्धनैः ॥५७॥ ब्राह्म
णेभ्यो दददग्रामान्नकुर्वंश्च देवकुलावलीः ॥ वनानि निजचिह्नानि तत्र तत्र प्रवर्त्तयन् ॥५८॥ वर्षत्रि
तयमात्रेण स सम्यगामर्णवावधिं ॥ सर्वग्रामप्रवं धेनमांधातेव वसुंधरां ॥५९॥ जिगाय प्रथमं प्रा
चीं दिशं तदनु दक्षिणां ॥ ततः प्रतीचीं पश्चाच्च प्रतापनिधिरुत्तमां ॥६०॥ प्रत्यूषग्रहमजटाख्यानां कि
रातानां निकेतनं ॥ स सुवर्णपुरं जिग्राद दंडजयाद् हहेलया ॥६१॥ याचकेलाससोमांतस्सर्वन्तिनांत

रग्म
२१

मनोरमा॥ तस्यां दिग्विजयभ्रांतः कियतोऽप्यास्त वासरान्॥६२॥ एकदा तु स तत्स्थ्यानादारुह्येंद्रा
युधं वने॥ मृगया निर्गतोऽपश्यत्किंनर्या सह किंनरं॥६३॥ आलोक्य कौतुकाकृष्टदृष्टिरश्वमु
खौ च तौ॥ आदित्सुः प्रेरयामास तावेव प्रति वाजिनं॥६४॥ अमर्त्यपुरुषालोकत्रासात्कैलासकंद
रे॥ प्रवेष्टुकामौ सहसा वेगेनानुससार तौ॥६५॥ पार्ष्णिप्रहरणाभ्यासयाहितो दय्यरंहसा॥ पं
च योजनमानाम्रस्तेनाऽध्वे नव्यलंघत॥६६॥ तौ च पर्वतमारूढावग्रतस्तस्य किंनरौ॥ तत
स्तद्ग्रहणेकांक्षां हृदयादुत्ससर्ज सः॥६७॥ अशक्तो दनुसर्तुं च कश्चित्परिजनो न तं॥ तार्क्ष्येणा
प्यनुगम्येत धावन्निंद्रायुधः कृतः॥६८॥ अथ क्लांतं समारूढश्रमस्वेदार्द्रविग्रहं॥ दृष्ट्वैकाकिन

22

मात्मानेश्वसंतंच तुरंगमम्॥६९॥ निर्वर्णीयं स्तसुदेशं मानुषाणामगोचरं॥ विहस्यैवात्मनात्मा
नं सान्तुतापमचिंतयत्॥७०॥ अहो किमपि मे मौर्ख्यमस्थानाभिनिवेशिनः॥ यदात्मा वालकेनेव व्यर्थ
मायासितो मया॥७१॥ अगृहीतेन को वार्थः कोऽर्थः प्राप्तेन वाऽमुना॥ किन्नरद्वितयेनेति मयामूढेन
नेक्षितं॥७२॥ पंथाम्निरूपितो नाय मा विहेनैव धावता॥ न चात्र लभ्यते मर्त्यो मम मार्गस्य देशिकः
॥७३॥ श्रूयते किल वर्षस्य भारतस्याऽवसानतः॥ केलाससन्निकृष्टेयमिह मर्त्यस्य का कथा॥७४
वने पर्णतृणाकीर्णे पादमुद्राश्च वाजिनः॥ न स्युर्यदनुसारेण यास्यामि शिविरं शनैः॥७५॥ के
वलं दक्षिणामाशां पुरस्कृत्य यथा तथा॥ गंतव्यं किंतु मध्याह्नसमयोऽयमुपस्थितः॥७६॥ अनु

न्तो निमग्नेण खेदस्तदिह सांप्रतं॥ लब्धा कुतोप्यपस्नांनिर्यासा पिपि गतश्रमः॥७७॥ इत्थं
विचिंत्य पानीयमन्वेषितुमितस्ततः॥ परिभ्रमन्घनस्निग्धं शाखिनां खंडमैक्षत॥७८॥ ततस्तदनु
कूलेन पथाऽगच्छत्समीरणैः॥ आह्लाद्यते नवोत्फुल्लकमलामोदवाहिभिः॥७९॥ मत्तद्विपमहासि
क्तमृणालदलदंतुरं॥ सपेयानसथाऽपश्यदेतत्सामनुमापकम्॥८०॥ तेन गत्वाऽग्रखंडस्य म
ध्येऽजलधिसन्निधौ॥ अदृष्टपारपर्यंतमालुलोकमहत्सरः॥८१॥ तदालोकनमात्रेण दूरादपग
तश्रमः॥ प्राप्य तत्पुलिनं पात्रं वाजिनोऽवततार सः॥८२॥ कृत्वाऽपनीतपर्याणं तं स्थलीलुठितोत्थि
तं॥ गृहीतशाद्वलग्रासमाप्लुताधूतकेसरं॥८३॥ उत्तार्य सरसस्तीरतरौ संयम्य वाजिनं॥ विश्रा

23

ग्निधे तु ल्लूनानि तृणान्येतस्य चाग्रतः ॥८४॥ स्वयं सस्नौ पपौ वारि बुभुजे बिसकंदली ॥ उत्तरीयशिरो
धानो निषसाद महीशिलातले ॥८५॥ ततो मुहूर्त्तं विश्रांतस्तत्र तस्मिन्सरस्तटे ॥ समुच्चरंतं सुश्राव गी
तध्वनिममानुषं ॥८६॥ तस्यां दिशि हृदासक्तचक्षुरुत्क्षिप्य कंधरः ॥ तमादौ निविडस्त्रात्र श्रुतिस्फिरिंद्रायु
धोऽभ्यगोत्त ॥८७॥ कुतोऽत्र विजने गीतमित्याविष्कृतकौतुकः ॥ उत्थाय चंद्रापीडोऽथ तामेव दिशमस
भ्यगात् ॥८८॥ गीतश्रवणलुब्धेन सलीलमभिधावता ॥ अदृष्टेनापि मार्गोऽस्य मार्गेणेव न्यवेद्यत ॥ कण्णतेस्म ३
॥८९॥ गत्वा प्रासादमैक्षिष्ठस्फाटिकं नातिदूरतः ॥ हसंतमिव कैलासलक्ष्मीं विगवमंशुभिः ॥९०॥
देवं चतुर्मुखं तत्र रत्नपीठप्रतिष्ठितं ॥ भगवंतमुमाकांतं ददर्श प्रणनाम च ॥९१॥ तस्याऽग्रे दक्षिणे राम

प्रासादे

२३

मूर्त्तिमाश्रित्य विहितासना ॥ उत्संगनिहितां वीणां वादयंती कलस्वनां ॥८२॥ देवै प्रज्ञाविता नेनउं
दगौरेणासर्पिता ॥ सा स्ताल्लक्ष्मीरिव क्षीरजलधेर्म्मध्यवर्त्तिनी ॥८३॥ कोपाग्निशमितानंगप्रसुप्तीव
नवोढया ॥ रतिः प्रसादयंतीव तपसा पार्वतीप्रिये ॥८४॥ नवेपि वयसि प्राप्नवैराग्यान्यासवासना ॥ व्य
चंद्रापीडेन
लोकि कन्यकां तेन धृतपाशुपतव्रता ॥८५॥ चंद्रापीडस्ततां दृष्ट्वा विस्मयाविष्टमानसः ॥ केयं र
स्यात्कन्यका नाऽस्या दिव्यतां प्रतिसंशयः ॥८६॥ नोत्कृष्टनिमिषे गंधेन्नवा गगनमुत्पतेत ॥ नमैानमवलं
वेतमर्त्त्यसंदर्शनेन वा ॥८७॥ इत्यादि चिंतयन्नास्तस्ते मावासितविग्रहः ॥ गीताऽवसानसमयप्रती
क्षणपरायणः ॥८८॥ सा च गीतं समापय्य विनिधाय च वल्लकीं ॥ प्रणम्य वेद्रचूडाय चंद्रापीडमम्या

षत॥९९॥अतिथेस्स्वागतं तुभ्यं सौम्य विश्रम्यतामिह॥आग्नेऽसि स्वामि मांभ्रामि मित आगम्यता
मिति॥१००॥चंद्रापीडस्तदाकर्ण्यवद्धात्मानममन्यत॥वद्धेती मनुवश्राजदेवतावत्सएगम्यतो॥१॥वि
वेशन्नातिदूरेऽथनिजाश्रमगुहामसौ॥स्थितांजिनकुशाऽल्लांवुपात्रदंडकमंडलुं॥२॥तत्रदर्भास
नासीनमुपविष्टमृगाजिने॥पप्रच्छ चंद्रापीडंसा स्वरूपागमनादिके॥३॥सतुसर्वंयथावृत्त
माचचक्षे सविस्तरं॥साचविज्ञाय वृत्तांतं निर्जगामवहिर्गुहः॥४॥गृहीतभिक्षापात्राच क्षणमा
त्रंतरोरधः॥आप्रयंति स्वयं शीर्णैः फलैस्तैर्दस्ततोपमैः॥५॥ततस्तदुपयोगायचंद्रापीडंन्ययुंक्त सा
॥अथतेस्मात्तयातस्यास्सचविस्मयमानधीः॥६॥तस्मिन्नथकृताहारे गिरिप्रस्रवणांतिके॥

राम
२४

भिक्षापात्रम् २   चंद्रापीडेन १   फरणा १

गत्वा सापि फलाहारप्रक्रियामात्रमाचरत्॥७॥ आगत्य च पुनस्तस्मिन्नुपविश्य मृगाजिने॥ ता
रापीडोऽज्जयिन्यादिकथया क्षणमास्त सा॥८॥ अपि नाम स्ववृत्तांतमद्य देव्यापि वर्ण्यते॥९॥ इच्छत्येवं
क्षणे दध्यौ चंद्रापीडस्य कौतुकं॥१०॥ दृष्ट्वा चास्याः प्रकृतिमधुरामाकृतिं भावशुद्धिं दाक्षिण्यं

स्ववार्ता४

च प्रकृतिसरलं लज्जवाक्याऽस्कारणः॥ आत्मोदंतं नियतमखिलं वक्ष्यति प्रार्थितयं चंद्रापीडः क्षण

विश्वास५

कृतरतिः प्रश्नसंप्रैत्ययोऽभूत्॥११॥ ॥इति कादंबरीकथासारे तृतीयः सर्गः॥ ॥३॥ ॥
स तद्गुणप्रभावर्द्धिवर्द्धमानकुतूहलः॥ तामवोचत माधुर्यविनयोदारया गिरा॥१॥ त्वत्प्रसादकृते
नैव प्रागल्भ्येन ममामुना॥ मनो भगवति प्रश्नचापले विनियुज्यते॥२॥ न मादृशा दृशोऽस्मि रि

यमाश्चर्यसंततिः॥ तदाख्यानप्रसादेन जैनौ यमनुग्रहप्यतौ॥३॥ कतमो मुनिगंधर्वसिद्धविद्याधरादि
षु॥ पुण्ये न जन्म नावासो भगवत्याविभूषितः॥४॥ येच ब्रतात्मकें चेदं धत्ते धवलतां वपुः॥ कथं का
मपि दिगंतिदंतकोत्पतिशायिनी॥५॥ नवे वयसि किंचातितीव्रवैराग्यकारणं॥ येनारण्यनिवा
सादि दुःखमीदृग्विषह्यते॥६॥ इतितस्मिन्वदत्येवं स्थूलाश्रुकणवर्षिणी॥ रुरोदवल्कलच्छन्नव
दनादिव्यकन्यका॥७॥ अकंपत मनश्चैनां चंद्रापीडस्यपश्यतः॥ इयमप्यास्तिनाम हृद्वं हृद्यंद
न्निश्रूयते॥८॥ असौ चिरं रुदित्वाच वल्कलोन्मृष्टलोचना॥ दीर्घमुष्णं च निश्वस्य वाहंकुमुपच
क्रमे॥९॥ राजपुत्र किमेतेन श्रोकैकवसतेर्मम॥ पापायामेदत्ताग्याया हत्तांतेन कृतेन ते॥१०॥

सुखदुःखे५
वकुं२
राम
२५

तथापि यदि ते चित्तं कुतूहलवशीकृतं॥ तदिदं वर्ण्यते सर्वमाकर्णय यथाक्रमं॥११॥ सुप्रसिद्ध
मिदं तावत्त्वगतं श्रुतिपथं तव॥ यत्संत्यप्सरसो नाम सुरसद्मनि कन्यकाः॥१२॥ चतुर्दश च तद्वंशाः
पृथक्पृथग्व्यवस्थिताः॥ सोमामृतसमीरा-ऽर्क-दक्ष-मन्वादिसंभवाः॥१३॥ दक्षकन्योद्भवं तेषु गंध
र्वाणां कुलद्वयं॥ कन्ये मुनिश्चारिष्टेति द्वे दक्षस्य बभूवतुः॥१४॥ तत्रैव चित्ररथो नाम गंधर्वाणामधीश्व
रः॥ मुनेः कृतयशाः पुत्रश्चित्रसेनादिसर्वजः॥१५॥ तुंबुरुप्रभृतीनां तु ज्येष्ठोरिष्टसुतः स्मृतः॥ हंसाभि
धानो गंधर्वराजः प्रथितपौरुषः॥१६॥ सख्यं। तत्र समुत्पन्नमन्तुकालुष्यदूषणं॥ गाढं परस्परं प्रे
म्णे तयोर्गंधर्वराजयोः॥१७॥ इतश्च नातिदूरेऽस्ति नानारत्नोज्वलो गिरिः॥ हेमकूट इति ख्यातस्तस्मिन्
चित्ररथहंसयोः १

कुलद्वये ४

हंसगौर्योः ४

वासस्तयोर्द्वयोः॥१८॥ तस्मिंश्च संतपसे ख्याता स्तत्सुतस्तेनसेभि नाम॥ गंधर्वास्तौ च विश्वं जन्मसिद्धेर्न
द्विषः पुरा॥१९॥ अथ यत्सोमसंभूतमेकमप्सरसां कुलं॥ गौरी नामोदभूत्कन्या तस्मिन्प्रति कृतिः
श्रियः॥२०॥ हंसो गंधर्वराजः ता सुहृदे तु हिनप्रभो॥ ततो यथार्थनामा मा पसद्वेष्या हंसगामिनी॥२१॥
चिरसंभृत विस्रंभ निर्भरं गृहवासिनोः॥ तयोः सद्म वत्सू नुरेको पिनमहात्मनोः॥२२॥ अहं तु मंद
भाग्येका कन्या उद्भूतका रिणी॥ उदभूवं तयोरस्य दुःखभारस्य भाजनं॥२३॥ अनपत्यतया तातो
मज्जन्मसुतजन्मवत्॥ अमन्यतं दत्कृतानंदः कृतो दारमहोत्सवः॥२४॥ देहच्छाया मिमां वीक्ष्य ता
तः सोमकममाणतो॥ चक्रे वर्णानुरूपं च महाश्वेतेति नाम मे॥२५॥ साहं पितृगृहे बाला वल्लका

राम
२६

वकलस्वना॥संचरंतीस्वचंचूनामेकादंकमहर्निशं॥२६॥अनवाप्तरसास्वादस्नेहादिहेदृसंतति

ऋत्यवाहयमक्लेशपेशलस्थितिर्षोशवे॥२७॥अथवाल्पात्यरंभ्रामंमयानानारसोचिते॥मनोभव

विकाराणांमेकमाययमनेवयः॥२८॥कदाचिदथरम्येश्रुमधुमासदिनेष्वहं॥अच्छोदसरसिस्नातुमा

गताऽहंसहांऽबया॥२९॥अहष्टपूर्वदिन्यत्रमंजरीमहमात्रेंदीं॥सखीभिस्सहपश्यंतीकाननेवाच

रं [illegible] चिरं॥३०॥कस्मिंश्चिदपिदेशेऽन्यपुष्पागोधाभिन्नावनं॥अन्पाद्भिघ्रमनाघ्रातपूर्वमामोदमद्भु

तं॥३१॥तस्यप्रभवजिज्ञासारसेनविहितत्वरा॥नातिदूरंततोगत्वाऽपश्यंमुनिकुमारकं॥३२॥अस्प

ष्टमिवकंदर्पमीशाननयनाग्निना॥कलंकविप्लुषाबिंबमदूषितमिवैंदवं॥३३॥विहदैरपिस्तूपस्य

मेखलाङ्कितवल्कलैः॥ कृताधिकमनोहारिरूपातिशयविभ्रमं॥ ३४॥ तेन कर्णे कृता काचिदपूर्वा तरुह्के
मंजरी॥ ततः प्रवृत्तमामोदं समाघ्रातवती सुभ्रूः॥ ३५॥ तं कुतोप्यागतं कांते लावण्यामृतनिर्झरं॥ च
क्षुषैव पिबंतीव कौतुकोद्विभ्रमस्मरा॥ ३६॥ रूपैकपक्षपातेन गुणदोषानपेक्षिणा॥ ततः कुसु
मबाणेन नीतास्मि वशमात्मनः॥ ३७॥ ततोऽसमंजसकामाऽहमप्रगल्भतया सुभ्रूः॥ केनापि प्रियमा
णावतदंतिकस्थ पापममम्॥ ३८॥ वंधोस्तु निजनम्रेतिप्रचलन्माणिक्कुंडली॥ अकार्षं वंदनं तस्मै तन्मु
खन्यस्तलोचना॥ ३९॥ ततः कृतप्रणामायां मयि सोऽपि मनोभवः॥ पतितो गोचरे चित्रमवे
ध्यानवितथ्यता॥ ४०॥ स्मरोपदिष्टयेवाऽथ बुद्ध्या तद्विकृतिं धिया॥ लब्धावकाशा रूपादिप्रश्नेष्वा

गत्वन्मार्गमें ॥४१॥ अथपार्श्वस्थमद्राक्षमन्यं मुनिकुमारकं॥ तुल्यतेजस्तपोवेषंतस्यसब्रह्मचारि
णी॥४२॥ भगवन्कथ्यतांकोयं किंमाख्यः किमिहागतः॥ कर्णेचनिहितोऽनेनकस्मैयंमंजरी
तरोः॥४३॥ सोऽब्रवीत्सुरलोकेऽस्तिसुरासुरशिरोर्चितः॥ श्वेतकेतुरितिख्यातो रूपेणाऽप्रति
मोमुनिः॥४४॥ पुंडरीकंसरःस्नातुंमयासौसकदाचन॥ नित्यंसंनिहितातत्रलक्ष्मीरेनंव्यलोक
त॥४५॥ सौतदालिंगनेनेवदर्शनेनैवकेवलं॥ पुंडरीकेकृतार्थत्वमवापस्वासनीकृते॥४६॥ उप
पादितदैवाऽस्यकुमारःसतयाश्रिया॥ तवपुत्रोयमित्युक्त्वाप्यवेदिश्वेतकेतवे॥४७॥ सोपियोग
दृशादृष्ट्वा यथावत्सुतमग्रहीत्॥ नामजन्मानुगं चास्य पुंडरीक इतिव्यधात॥४८॥ योजयामास

५ लक्ष्मीः

अतुल्यः ३

श्वेतकेतुः ४

28

संस्कारैरेनं मुनिजनोचितैः ॥४८॥ ततो बालभावेन न्ययुंक्त तपसे पिता ॥४९॥ अयं स पुंडरीकस्ते वर्णि
तः श्रृणु मंजरीम् ॥ चतुर्दशीमिति कृत्वाऽद्य प्रस्थितोऽयं शिवालये ॥५०॥ व्रजतो नंदने चाऽस्य वनदे
वतया स्वयं । चदाकृतेरलंकारस्कल्पो यमिति सादरं ॥५१॥ पारिजातद्रुमादेषा दुग्धोदधिसमुद्भ
वात् ॥ आदाय मंजरी कर्णेऽनिहितोऽपि निवेशिता ॥५२॥ इति तस्मिन्वदत्येव स्वचापल्येन हसतामियम् ।
किमनेन तनुया ह खेदेनेत्यभिधाय मो ॥५३॥ अनायि मुनिना तेन सा सुरद्रुममंजरी ॥ अपनीय मि
ज्जात्कर्णान्मम कर्णावतंसतो ॥५४॥ मत्कपोलतलस्पर्शप्रकंपतरलांगुलेः ॥ व्रश्यंती तेन मा ऽज्ञायि
स्वाक्षमाला निजात्करात् ॥५५॥ अप्राक्षेव च साऽभ्रमि मया हि सहसा मया ॥ तस्मिन्नवसरे त्वत्र्या

नीता ३ पुंडरीकेन ३

हिणीमामवोचत॥५६॥स्नातादेवाचिरं मर्त्तर्दारिकेगम्यतामिति॥तस्मात्प्रतिनिवृत्तायांमयितस्य
सखावदत्॥५७॥वयस्यकिमिदंचेतस्तवविद्रुतमीदृशं॥हतामप्यनयाऽज्ञासीरक्षमालांनकन्य
या॥५८॥हतानामियमनयाहृदयंनतुरक्ष्यते॥ततोऽसौपुनरागत्यकृतकोपमिवाऽब्रवीत्॥५९॥
अपहृत्याऽक्षमालांमेकचौरेणिनतुगम्यते॥अथमंदंविहस्यैवमयाऽस्यैनिहिताकरे॥६०॥अस्त्रमु
क्ताऽक्षमालेतिकंगन्तुमुक्तावलीनिजात्॥साप्यलक्ष्यतनाऽनेनमन्मुखासक्तदृष्टिना॥६१॥सखीनि
रुचिमेदृष्टमिदंचापलमुत्कंठकैः॥किंचित्संजातलज्जेवसरस्तटमुपागम्मम्॥६२॥तत्राऽहमस्ततेत्रैवमु
कुस्नात्वायथातथा॥६३॥कगताऽस्मिकिमायातादृष्टः कोसावहंवका॥किमिदंकःप्रकारोऽयमितिना

५ पुंडरीकेन

४ग्रहादितिथिः३

पुंडरीकस्य४

३ स्वप्नं
29

हासिषं तदा ॥ ६४ ॥ मुहूर्त्तो दिवतांबूलकरंकग्राहिणी मम ॥ प्रिया तरलिकानाम सा प्रविश्येदमब्र
वीत् ॥ ६५ ॥ कर्णेषु निकुमारेण कृता तेयेन मंजरी ॥ त्वय्यागतायां पृष्ठो ऽस्मि स्वरूपं तेन तावकं ॥ ६६
तैश्छुत्वा मदियैतेन लिखित्वा वस्त्रपट्टिका ॥ एकाकिन्यो त्वया तस्यै देयेत्युक्त्वा समर्पिता ॥ ६७ ॥ त
तस्तरलिकायास्तां हस्ताद्दादायपट्टिकां ॥ तस्यां तल्लिखितामार्यामिमामहमवाचयी ॥ ६८ ॥ दूरं मुक्ताः
लतया विसंसितया विप्रलभ्यमानो मे ॥ हंस इव दर्शिताशो मानसजन्मा त्वया नीतः ॥ ६९ ॥ सा त्वं तैमि
रिकस्येव वन्ध्यवंबूलक्षणा ॥ मोहायाथापि नायाति सुतरां मनसो मम ॥ ७० ॥ वदतेन किमुक्तो ऽसि स
किं भुक्तः त्वयापि वा ॥ तदेति केचविस्रब्धमुषितास्मि कियच्चिरं ॥ ७१ ॥ एवं तरलिकोतत्र चालयंतापुनःपुनः

स्व २९

राम

पुंडरीकशंकया ३

कांचिदङ्कस्थितो मात्रा शुन्मत्तेवाऽभ्यवाहयत् ॥७२॥ अथ प्रलीयमानेऽर्के प्रतीहारी प्रविश्य मे ॥ भर्तृदारिके
या दृष्टौ यौ तौ मुनिकुमारकौ ॥७३॥ तयोरन्यतरो द्वारि तिष्ठतीति न्यवेदयत् ॥ शीघ्रं प्रवेशयेत्युक्ता मयात
द्दैन्यशंकया ॥७४॥ सा च प्रवेशयामास तस्य तं सहचारिणी ॥ सत्कारेणोचितेनाऽहं नम्या चैनमपूजयं ॥७५
मुक्तेर्मिव विश्रम्य पर्यंके मदुपाहृते ॥ मदुत्तरीयसंमृष्टमाधौतचरणद्वयी ॥७६॥ दृष्टिं तरलिकायां च
कृत्वा कामः क्षणं व्यधात् ॥ मयासोऽज्ञायिष्टस्फुटलज्जमान इवाऽभ्यधात् ॥७७॥ अहं कपिंजलो नाम तस्य
बालसुहृन्मुनेः ॥ नवाक्प्रवर्त्तते चास्मिन्ननन्यस्त इवाऽध्वनि ॥७८॥ क्वायं मुनिजनः शांतः क्व चाऽमीरा
गविभ्रमाः ॥ तथापि व्यवसायो मे सुहृत्स्नेहरुगाश्रितः ॥७९॥ न हूयसे प्रयाता या राजपुत्रि तदा मयि ॥

30

हस्ते मुक्तावलीं विभ्रत्स ममांतिकमागतः॥८०॥ अहो रम्याऽक्षमालेयं चेयानीतेति तं द्रुतं॥ विह
स्य स मया किंचिन्नोक्तश्चिंतोपपत्तये॥८१॥ नोपदेशप्रकारोऽसौ न स हर्षो न विस्तरः॥ न सोऽस्तु
पायो मैत्री वा यो मया नाध्यधीयत॥८२॥ वचोभिः खिद्यमानो मे त्रपानतशिरोधरः॥ क्षणमेत हितो मक्तः
सुतरामामपीडयत्॥८३॥ कष्टादिव मया लब्धो विविच्य सकलं वनं॥ अन्य एव स संवृत्तो वक्वसांयो
नगोचरः॥८४॥ तदवस्थं तमालोक्य विरताशः प्रबोधने। अहं तस्याण्यरक्षार्थमेवं यत्नपरोऽभवं॥
॥८५॥ आस्तीर्य नलिनीपत्रशयनं चेदनोक्षितं॥ तत्रस्थस्यास्य कर्पूरपांसूनंगेष्ववाकिरं॥८६॥
त्रपया तदवस्थोऽपि स किंचिदुन्मुक्तमस्तमः॥ सबाष्पमलिनां दीनां मयि दृष्टिमपातयत्॥८७॥ ततो

ऽहमिदमेवात्र प्राप्तकालमचिंतये ॥ राजपुत्रि सुहृत्प्राणदक्षिणार्थमुपागतः ॥ ८८ ॥ अतः परं तु सा
मर्थ्यागतार्था मम या गिरः ॥ कं गेवि परिवर्तेत कश्चित्त्वमपि वेत्स्यतां ॥ ८९ ॥ इति तस्मिन्वदत्येव प्रविश्य
ग्राहकंचुकी ॥ चमस्वस्थशरीरेति ज्ञाचा देवी समागता ॥ ९० ॥ तच्छ्रुत्वा ऽजनसम्मर्दजा रुध्याति: कपिंज
लः ॥ न स प्रतिवचः किंचित्मामकीनमपेक्षत ॥ ९१ ॥ तदुक्तो ऽनुदर्शात्स्वजनस्यावेघता हशी ॥ आगतां
वागतां वापि नाऽहंसंवामलक्षये ॥ ९२ ॥ ततः कमलिनीत्यक्तारात्रौ क्वापि गते रवौ ॥ उदिते सर्वथावा
मे विधौ वै धैर्यनाशिनि ॥ ९३ ॥ उन्मूलितेव कामेन दग्धेव विरहाग्निना ॥ पुनस्तरलिकामेव साभ्यर्क
गमवादिषं ॥ ९४ ॥ अहं यथा तथा वापि न वेद्यं सत्नुमन्यते ॥ कथं नु भविष्यती त्येषा चिंता दोलायतीव मां ॥ ९५ ॥

3|

इतः शास्त्रं कुलाचारो लज्जा गुरुजनाद् भयं॥ इतः कामोऽतिदुर्द्धर्षो विरहे मरणाद् भयम्॥ ८६॥ वद किं
करवाण्यत्र पुष्यतीव मनो मम॥ मा स्मन्मेदुस्तरे विप्रवधेनस्मिनि मज्जने॥ ८७॥ इत्यादि विलपन्त्या
मे तत्काल सुलज्जोदया॥ जहार चेतनां स्त्रीणि इव नयनेष्फुति॥ ८८॥ अथ मां ग्राहयित्वाऽसौ सं
ज्ञां शीतजलानिलैः॥ निपत्य पादयोस्साश्रुनेत्रा तरलिकाऽवदत्॥ ८९॥ गान्धर्वस्तो विवाहोऽयमित्थ
याऽन्योन्यसंगमः॥ शास्त्रेषु पठितस्तस्मान्न लीषु निषिद्ध्यते॥ ९०॥ तथेव पुत्रा तत्कालयोग्यवेषं
हाय हाहा॥ तामेकामग्रतः कृत्वा निर्गताऽहमलक्षिता॥ ९१॥ अभ्यागममिमं मोऽस्मि मे तस्य कपचडुलैः प
दैः॥ तदा मे दक्षिणो चक्षुरस्पन्दत मुहुर्मुहुः॥ ९२॥ अव्यक्तमिव चाऽश्रौषं कानने रुदितध्वनिं॥ ते नैवाम

अभिसारिकारू
पचरेसर्गः ५

राम
३१

इत्यादिविलपंतेकपिंजलम्ऱुणुवमितिश्लोकचतुर्थेनान्वयः १

न्नणे काऽहमगछमधिकत्वरा॥३॥ यदा निकति चिह्नं त्वां हा वयस्य तपोनिधे॥ पुंडरीककयातोऽ
स्मिन्नस्यं कृत्वाजगत्त्रये॥४॥ हा हतोऽस्मि विलीनोऽस्मि दग्धोऽस्मि करवाणि किं॥ गत्वा तानस्य वदामि श्वे
तकेतोः किमश्रुतः॥५॥ अयि पापे महाश्वेते न नु दृष्टास्यऽहमालया॥ हतामे सुहृदोऽसुष्य प्राणा हृतिरपि
त्वया॥६॥ वयस्य देहि मे वाचं न जीवामि त्वया विना॥ ततोऽमृणुवमित्यादि विलपंते कपिंजले॥७॥ अथ
प्रकंपमानांगी विसंष्टुलपदक्रमा॥ केनाप्युत्क्षिप्य नीतेव तं प्रदेशमऽयाशिषं॥८॥ गत्वा तमहमद्राक्षं त
वद्गतोत्क्रांतजीवितं॥ किंचिरेणागताऽसीति रुषित्वेव तत्क्षणास्थितं॥९॥ एतावदुक्त्वा मूर्छांधकारस्वच्छतां
तमनंतरं॥ विवक्ष्यंतीव सा कन्या निपपात शिलातले॥१०॥ प्रनष्टचेतनां चेनां चंद्रापीडोऽप्यलोकयत॥

प्रभ्रकारिण माल्मा नेह तागसमम न्यत॥११॥ ससंभ्रमं समुत्थाय कदलीदलमारुतैः। तोयैश्च शि
शिरैः स्वच्छैः संज्ञामेनामजिग्रहत॥१२॥ अवाप्तचेतसा नाचा ऽसौ स्मृत्वा तद्व्यसनं निजं। तदेवानुज
वंती वरुरोद विललाप च॥१३॥ तस्याः मथनमन्त्रांत हृदयानि तदाश्रुव। प्रतिशब्देन चैवोच्चैर्दिशो
पिरुरुदुश्चिरं॥१४॥ चंद्रापीडोपि तामाह बाष्परुद्धविलोचनः। आस्तां न शक्यते वक्तुं प्रोक्तुं वा
न्यद ऽतः परं॥१५॥ कथमप्युपसंहृत्य शोकावेगं तु सा ऽवदत्। किमतः परमस्त्यस्या हतायाः श्रोतव्य
मे वच॥१६॥ किंतु क्लेशाय येनाशावेधेन हृतजीविते। राजपुत्र त्वितिमूर्मीदं तदाश्चर्यं ब्रवामि ते॥
१७॥ तदा तस्याति तीव्रस्य दुःखदावस्य तादृशः। न काचिन्मरणादन्या मया ग्राहि प्रतिक्रिया॥१८॥

मरणव्यवसायनिश्चयेकृतवत्यस्मिंश्चसंविधानके॥निरियायचचंद्रमंडलात्पुरुषःकोपिहिमोप
मद्युतिमान्‌ध्यः॥सोऽवतीर्य्यगगनान्महीतलेतंनिधायभुजपंजरांतरे॥उत्पतान्दिवमुदात्तयागि
रामामवोचतपितेवसांत्वयन्॥२०॥विरममरणोपायादस्मात्प्रियेएतावाऽमुनापुनरपिमहाश्वे
तेवसेनविधातिसंगमः॥[illegible]इतिगिरमिमांश्रुत्वातस्मात्ससंभ्रमविस्मयाकिमिदमितितंतत्रा
पृच्छंप्रसत्यकपिंजलो॥२१॥प्रियसखमपस्त्यकाधुनागच्छसीतिस्फुरितविकटकोपाटोपमु
क्ता ईदृक्षिः॥ममवचनमदत्वाकिंचिदेवातिवेगात्कृतपरिकरबंधस्सोऽप्यऽगादंतरिक्षं॥२२॥प्रत्य
क्षं मम ते त्रयोपिविविशुःशीतत्विषोमंडलेतत्संप्रत्ययसंहृतोचितविधिःसास्मिप्रितेदंव्रतं॥

तातेनापि ततः प्रभृत्यऽहमिहासी नैव नेतुं गृहं यत्नेनापि न पारितेति स चिरं स्थित्वागतः स्वान्गृहान्॥१३॥
॥ ॥इति कादंबरीकथासारे चतुर्थः सर्गः॥४॥ ॥श्री॥ ॥इत्यावेदितनिर्व्याजवृत्तांतबहुविस्तरा॥ विर
राज महाश्वेता निःश्वासम्लापितद्रुमा॥१॥ चंद्रापीडस्कतच्छायन्मनोजवविजृंभितं॥ सकंपविस्मयोपेत
स्तामथोवाच सोत्वयन्॥२॥ मयानेविरहृत्तोपि परित्यागमपश्यता॥ शोकः प्रत्यग्रतो नातः कौतुका
विहृचेतसा॥३॥ सा त्वमर्हसि कल्याणि न शोकं कर्तुमीदृशं॥ आश्वासितासि देवेन स्तनं चंद्रमसा स्वयं
॥४॥ कोन्यस्तथाविधाकारस्तदुक्ति मर्मडलाज्ञतः॥ निर्गत्य तत्रैव विशन्निशि संभाव्यते नरः॥५॥ श्रू
यंते गतयश्चित्रा देवतानामनेकशः॥ वरशापतपःशक्तियोगवैचित्र्यनिर्मिताः॥६॥ श्वेतकेतुश्च तस्या

स्तेप्रजापतिसमःपिता॥नास्त्येवतस्यापत्येतेसामवश्यंनामकिंचन॥७॥इत्यादिश्रुत्वापुपन्यासैरिति
हासैर्निदर्शनैः॥महाश्वेतांसमाश्वास्यपुनःपप्रच्छतामसौ॥८॥सातेतरलिकानामविस्रंभनिर्भ
तासखी॥गताभगवतिक्वाद्यनहिसाद्यांविमुंचति॥९॥दृष्टोवात्वमहाश्वेताकासौयातितपस्विनी
श्रृण्वत्रापिनिमित्तंमेयथासौप्रहितामया॥१०॥यश्चचित्ररथोनामगंधर्वाधिपतिर्म्मया॥वर्णितो
येनदेवोयंप्रत्यक्षोपिमहेश्वरः॥११॥येनखानितमत्यच्छमच्छोदाख्यमिदंसरः॥येनचैत्ररथंनामकृ
तमेतच्चकाननं॥१२॥यस्यामृतात्समुत्पन्नेप्रसूताप्सरसांकुले॥महिषीमदिरानामजीवितादपिव
ल्लभा॥१३॥तयोःकादंबरीनामकन्याऽस्तिनवयौवना॥लक्ष्मीमुपहसंतीवरूपलावण्यविभ्रमैः॥१४॥

विश्वासनिश्च
लेत्यर्थः२

तयासह महाप्रेमबाल्यात्प्रभृति मे तथा॥ यथैकमेव जानाति सनोऽजीवितमावयोः॥१५॥ विदित्वादग्ध
वृत्तांतमिमं सपदि मामकं॥ सा ऽग्रहीन्नियमं बाला वार्य्यमाणापि बंधुभिः॥१६॥ महाश्वेताऽस्य दुःख
स्यया क्वालमतेऽवधिं॥ तावन्मया न सोढव्यं पाणिग्रहणेहे मात्मनः॥१७॥ यतो यथा यथा तस्या यौ
वनश्रीर्विजृंभते॥ ततस्तथा तथा खेदं धत्ते चित्ररथोप्यरं॥१८॥ सेदिष्टं तेन मे पुत्रि यतस्त्वा वदिता
तथा॥ यथेमं दुर्ग्रहग्रंथिं विमुंचति तव स्वसा॥१९॥ ततस्तरलिका तत्र मयाऽकरणो चिती॥ प्र
हिता वद्धसेदिश्य श्वश्वभ्यागंत्यै वसा ततः॥२०॥ इतीत्थं कथयानीत्वा महाश्वेताश्रमे दिने। चंद्रा
पीडः प्रयातेस्तमर्के संध्याविधिं व्यधात्॥२१॥ तत्रेंद्रायुधमानीय संयम्यानि चुल्ले कचित्त महा

श्वेतोदिते देशे पर्णशय्यामकल्पयत्॥२२॥ तस्य शय्यां निषण्णस्य श्रांतस्यापि यथा तथा॥ कथामाश्च
र्यबहुलां तामेवध्यायतश्चिरं॥२३॥ पुनः पुनर्महाश्वेतां वैशंपायनमेव च॥ पत्रलेखां च सा रात्रिर्ग
ता प्रायेण जाग्रतः॥२४॥ इंद्रायुधस्य वाहा ऽथ महाश्वेतां सुखे दृशो॥ स प्रत्यभिज्ञमश्वोपि दृष्टिमानु
प्रवद्दौ॥२५॥ अयातायां तु सर्द्धेयं कृतप्रात्तातिकक्रिये॥ समाधेरुत्थितां बुध्वा महाश्वेतां तदंतिक
म्॥२६॥ चंद्रापीडे प्रविष्टे थ नातिदूरं गते रवौ॥ स गंधर्वकुमारा ऽसौ ततस्तरलिकायुतो॥२७॥ साप्रवि ७
महाश्वेतां प्रणिपत्योपविश्य च॥ सिद्धार्थासीति तत्स्पष्टाचलितग्रीवमब्रवीत्॥२८॥ त्वत्संदेशं निशम्यो
क्तं यन्त्वया मत्से हारिके॥ तच्चतत्क्षणनाकारि केयूरकमुखात्स्मृणु॥२९॥ अथ केयूरकः प्राह ना ऽ

मन्निशासिचेतसः॥स्वस्यस्वमेवचेतस्तेमन्मनःकिंपरीक्षसे॥३१॥भूमिर्वैताढ्यशस्याऽहस्तुप्रालेन
स्यभ्रूयसः॥तथावननिवासिन्यो त्वय्यऽहेऽत्रहवासिनी॥३२॥आकर्ण्यतवसंदेशवचस्सरलिका
मुखात्॥एषतेप्रतिसंदेशःप्रियसख्यानिवेदितः॥३३॥इतिश्रुत्वामहाश्वेताचिरंनिश्चललोचना
